International Journal of Jyotish Research (वेदचक्षु)

**ISSN:** 2456-4427
**Impact Factor:** RJIF: 5.11
Jyotish 2022; 7(1): 40-44
© 2022 Jyotish
www.jyotishajournal.com
Received: 14-01-2022
Accepted: 19-02-2022

**डॉ. सीमा जैन**
असिस्टेंट प्रोफेसर, सामान्य संस्कृत विभाग, राज. महाराज आचार्य संस्कृत महाविद्यालय, जयपुर, राजस्थान, भारत

**Correspondence**
**डॉ. सीमा जैन**
असिस्टेंट प्रोफेसर, सामान्य संस्कृत विभाग, राज. महाराज आचार्य संस्कृत महाविद्यालय, जयपुर, राजस्थान, भारत

# शिशुपालवधमहाकाव्ये ज्योतिषशास्त्रज्ञानं शकुनविचारश्च

**डॉ. सीमा जैन**

## प्रस्तावना

वैदिकयज्ञानां कालनिर्धारणाय, शुभमुहूर्तानां निर्धारणाय नक्षत्राणां स्थितिज्ञानाय च ज्योतिषस्य महत्त्वम्। यथोक्तम् –

वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानि पूर्वा विहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञम्।।[1]

महाकविमाघो ज्योतिषशास्त्रस्य ज्ञाता। शिशुपालवधे ग्रहाणां, नक्षत्राणां, मासानामृतूनाञ्च विवेचने माघस्य ज्योतिषज्ञानं प्रतिबिम्बतम्। सूर्यचन्द्रादिग्रहाणां स्थितिवर्णनेन सह शकुनशास्त्रीयज्ञानमपि प्रकटितं महाकविना। श्लोकोऽयं द्रष्टव्यः-

ओमित्युक्तवतोऽथ शाङ्र्गिण इति व्याहृत्य वाचं नभ-
स्तस्मिन्नुत्पतिते पुरः सुरमुनाविन्दोः श्रियं बिभ्रति।
शत्रूणामनिशं विनाशपिशुनः क्रुद्धस्य चैद्यं प्रति
व्योम्नीव भ्रुकुटिच्छेन वदने केतुश्चकारास्पदम्।।[2]

तस्मिन्। सुरमुनौ नारदे इति इत्थंभूतां वाचं व्याहृत्योक्त्वा नभ उत्पतिते समुद्गते पुरोऽग्रे इन्दोः श्रियं बिभ्रति सति। अथ मुनिवाक्यानन्तरम् ओमित्युक्तवतः तथास्त्वित्यङ्गीकृतवतः। चैद्यः शिशुपालः। तं प्रति क्रुद्धस्य शाङ्गिणो वदने व्योम्नीवानिशं सर्वदा। शत्रूणां विनाशस्य पिशुनः सूचकः। 'चन्द्रमभ्युत्थितं केतुः क्षितीशानां विनाशकृत्' इति शास्त्रादिति भावः। केतुः

उत्पातविशेषः। भ्रुकुटिच्छलेन भ्रूभङ्गव्याजेनास्पदं प्रतिष्ठां स्थितिं चकार।

चन्द्रग्रहणस्य सूर्यग्रहणस्य च सङ्केतः कविना कृतः। चन्द्रग्रहणं यथा –

नीतिरापदि यद्गम्यः परस्तन्मानिनो ह्रिये।
विधुर्विधुन्तुदस्येव पूर्णस्तस्योत्सवाय सः।।[3]

विधुन्तुदः पूर्णचन्द्रमेव ग्रसते इति तथ्यमत्र वर्णितम्। सूर्यग्रहणं यथा –

सविषश्वसनोद्धतोरुधूमव्यवधिम्लानमरीचि पन्नगानाम्।
उपरागवतेव तिग्मभासा वपुरौदुम्बरमण्डलाभमूहे।।[4]

तिग्मभासा सूर्येण उपरागवता राहुग्रासवतेव। राहुग्रस्तेनेवेत्यर्थः। पन्नगानां सविषैः श्वसनैः फूत्कारैरुद्धतेनोरुधूमेन यो व्यवधिस्तिरोधानं तेन म्लाना निष्प्रभा मरीचयो यस्य तत्। अत एवौदुम्बरमण्डलाभं ताम्रपिण्डसच्छायम्। वपुरूहे ऊढम्। अत्र सूर्यग्रहणस्य चित्रमुपस्थापितं कविना। उत्तरायणदक्षिणायनयोः प्रभावस्य वर्णनं निम्नलिखितश्लोके कृतम्-

कौबेरदिग्भागमपास्य मार्गमागस्त्यमुष्णांशुरिवावतीर्णः।
अपेतयुद्धाभिनिवेशसौम्यो हरिर्हरिप्रस्थमथ प्रतस्थे।।[5]

अथोद्धववाक्यश्रवणानन्तरम्। अपेतो युद्धेऽभिनिवेश आग्रहो यस्य सः। शान्तक्रोध इत्यर्थः। अत एव सौम्यः प्रसन्नः। अत एव कौबेर्या दिशो भागम्। उत्तरायणमित्यर्थः। तमपास्य त्यक्त्वा, अगस्त्यस्येममागस्त्यं मार्गमवतीर्णः। दक्षिणायनं गत इत्यर्थः। उष्णांशुरिव स्थितः। हरिः कृष्णो हरिप्रस्थमिन्द्रप्रस्थं प्रतस्थे प्रचचाल। उत्तरायणे सूर्यरश्मयोऽसह्या भवन्ति, दक्षिणायने च सह्याः भवन्तीति तथ्यमत्र सङ्केतितम्।

एवमेव –

दिशमर्कमिवावाचीं मूर्च्छागतमपाहरत्।
मन्दप्रतापं तं सूतः शीघ्रमाजिविहायसः।।[6]

मूर्च्छागतं रामेषुपातान्मोहमुपगतम्। अत एव मन्दप्रतापमल्पप्रकाशं तं वेणुदारिणमवाचीं दक्षिणां दिशं प्राप्तम्। अत एव मन्दप्रतापमर्कमिव सूतः सारथिरनूरुश्च आजेर्विहायसः आकाशादिवाजिविहायस इत्युपमितसमासः। शीघ्रमपाहरदपसारितवान्। दक्षिणायनं गतः सूर्यः शीघ्रमस्तमेतीति तथ्यमत्र सङ्केतितं कविना।

महाकविः पुष्यनक्षत्रेण तुलना श्रीकृष्णरथस्य तुलनां करोति –

रराज सम्पादकमिष्टसिद्धेः सर्वासु दिक्ष्वप्रतिषिद्धमार्गम्।
महारथः पुष्यरथं रथाङ्गी क्षिप्रं क्षपानाथ इवाधिरूढः।।[7]

महान् रथो यस्य स महारथो रथिकविशेषः। रथाङ्गं चक्रमस्यास्तीति रथाङ्गी हरिः इष्टसिद्धेः सम्पादकं लक्षणवत्त्वात्। 'पुष्यः सर्वार्थसाधकः' इति शास्त्रादिति भावः। सर्वासु दिक्ष्वप्रतिषिद्धमार्गम्। अनिषिद्धगमनमित्यर्थः। अधिष्ठानशक्तेर्निरङ्कुशत्वात्'। 'पुष्यो हस्तो मैत्रमप्याश्विनञ्च चत्वार्याहुः सर्वदिग्द्वारकाणि' इति शास्त्रादिति भावः। क्षिप्रगामिनम्, अन्यत्र क्षिप्रनामकम्। 'क्षिप्रं चाश्विदिनेशपुष्यम्' इति शास्त्रात्। पुष्यरथं क्रीडारथम्। अधिरूढः सन् पुष्यो रथ इव तं पुष्यरथमधिरूढः पुष्यनक्षत्रगतः क्षपानाथश्चन्द्र इव रराज।

प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता।

अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्त्रमपि।।[8]

विधौ दैवे प्रतिकूलतामुपगते सति बहुसाधनता अनेकसाधनवत्ता विफलत्वमेति। महत्यपि साधनसम्पत्तिर्निष्फलैवेत्यर्थः। तथा हि - पतिष्यत आसन्नपातस्य दिनभर्तुः करा अंशवो हस्ताश्च। तेषां सहस्त्रमपि अवलम्बनायावष्टम्भनाय नाभूत्। अतो दैवमेव प्रबलमिति भावः। ज्योतिषशास्त्रेऽपि चन्द्रमसः पृष्ठवर्तित्वमनिष्टकारकं कथितम्। यथा –

सम्मुखे ह्यर्थलाभाय दक्षिणे सुखसम्पदः।
पृष्ठतो मरणं चैव वामे चन्द्रे धनक्षयः।।
इदमेव तथ्यं कविना सङ्केतितमत्र।

ज्योतिषसम्मतदुरुधरायोगस्य ज्ञानमेवं प्रकटितं कविना –

पवनात्मजेन्द्रसुतमध्यवर्तिना नितरामरोचि रुचिरेण चक्रिणा।
दधतेव योगमुभयग्रहान्तरस्थितकारितं दुरुधराख्यमिन्दुना।।[9]

पवनात्मजेन्द्रसुतमध्यवर्तिना भीमार्जुनमध्यगतेन रुचिरेण चारुणा चक्रिणा हरिणा उभयोरर्कादिग्रहाणामन्यतमयोरन्तरे मध्ये स्थित्या वासेन कारितं सम्पादितम्। दुरुधरेत्याख्या यस्य तं दुरुधराख्यं योगं दधता। अर्कान्यग्रहमध्यगतेनेत्यर्थः। इन्दुनेवेत्युपमा। नितरामतिशयेन। अरोचि अशोभि। स्वभावरमणीयस्यानु- रूपान्तरसमायोगाच्छोभातिशयो जायते। रत्नकाञ्चनयोरिवेति भावः। अत्र भगवानाचार्यवराहमिहिरः -

हित्वार्कं सुनफाऽनफादुरुधराः स्वान्त्योभयस्थैर्ग्रहैः।
शीतांशोः कथितोऽन्यथा तु बहुभिः केमद्रुमोऽन्यैस्त्वसौ।। (बृहज्जातके 13/3)

एतदेव स्पष्टीकृतं कल्याणवर्मणा-

रविवर्जं द्वादशगैरनफा चन्द्राद्द्वितीयगैः सुनफा।
उभयस्थितैर्दुरुधरा केमद्रुमसंज्ञिकोऽतोऽन्यः।। इति।

नैषधीयचरितस्य नैषधप्रकाशव्याख्यायां नारायणभट्टेनोद्धृतं यत् –

'गुरुभार्गवयोर्योगश्चन्द्रेणैव यदा भवेत्।
तदा दुरुधराख्यः स्यात्।'

एतदनुसारं बृहस्पतिशुक्रयोर्मध्ये यदा चन्द्रस्य स्थितिर्भवति, तदा 'दुरुधरा' योग- भवति। ज्योतिषशास्त्रीयज्ञानेन सहैव शकुनशास्त्रीयज्ञानमपि प्रकटितं कविना। यथा -

दयिताय सासवमुदस्तमपतदवसादिनः करात्।
कांस्यमुपहितसरोजपतद्भ्रमरौघभारगुरु राजयोषितः।।[10]

दयिताय प्रेयसे उदस्तं पानार्थमुत्क्षिप्तं सासवं समद्यमत एवोपहिते वासनार्थं निहिते सरोजे पतन् भ्रमरौघ एव भारः तेन गुरु दुर्भरम्। कास्यं पानभाजनम्। राजयोषितः कस्याश्चिद्राजवध्वाः संबन्धिनो अवसादिनः शैथिल्यभाजः करादपतत्। तच्च दुर्निमित्तमिति भावः। एतेनास्या भाविविरहशोकादेवाप्रसन्नदृष्टेः काचिच्चिन्ता व्यज्यते।

न मुमोच लोचनजलानि दयितजयमङ्गलैषिणी।
यातमवनिमवसन्नभुजान्न गलद्विवेद वलयं विलासिनी।।[11]

दयितस्य जयमङ्गलम्। तदिच्छतीति तदेषिणी विलासिनी काचिदङ्गना लोचनजलान्यश्रूणि न मुमोच। अश्रुपातस्यामङ्गलत्वादिति भावः। अमङ्गलं तदन्यतः प्रवृत्तमेवेत्याह-यातमिति।

अवसन्नभुजाच्छोकशिथिलात्कराद्गलद्भ्रश्यदेवावनिं भुवं यातं प्राप्तं वलयं कङ्गणं न विवेद। अवश्यभाविनां को निवारक इति भाव:।

प्रविवत्सत: प्रियतमस्य निगडमिव चक्षुरक्षिपत्।
नीलनलिनदलदामरुचि
प्रतिपादयुग्ममचिरोढसुन्दरी।।[12]

अचिरोढसुन्दरी काचिन्नवोढा स्त्री प्रविवत्सत: प्रवासं कर्तुमिच्छत:। प्रियतमस्य प्रतिपादयुग्मं पादयुग्मे। नीलनलिनदलदामरुचि नीलोत्पलमालासच्छायमित्युपमा। निगडमिव शृङ्खलामिव चक्षुर्नेत्रमक्षिपत्। चक्षुषो दूरे पदमपि गन्तुं न शशाकेत्यर्थ:। तच्च दुर्निमित्तमिति भाव:। प्रयाणे स्त्र्यवलोकननिषेधात्।

सह कज्जलेन विरराज नयनकमलाम्बुसन्तति:।
गण्डफलकमभित: सुतनो: पदवीव
शोकमयकृष्णवर्त्मन:।।[13]

सुतनो: शुभाङ्ग्या गण्डफलकमभित:। गण्डस्थलयोरित्यर्थ:। नयन-कमलाम्बुसन्ततिरश्रुधारा कज्जलेनाञ्जनेन सह शोक एव शोकमयस्तस्य कृष्णवर्त्मन: शोकाग्ने: पदवी नि:सरणमार्ग इव विरराज शुशुभे। येन वर्त्मना अग्निर्गच्छति तत्कृष्णं भवतीति कृष्णवर्त्मा। अत्राप्यश्रुपात एव दुर्निमित्तमिति भाव:।

व्रजत: क्व तात व्रजसीति परिचयगतार्थमस्फुटम्।
धैर्यमभिनदुदितं शिशुना
जननीनिर्भर्त्सनविवृद्धमन्युना।।[14]

जनन्या अपशकुनभीताया मातुर्निर्भर्त्सनाद्विवृद्धमन्युना प्रवृद्धकोपेन शिशुना बालकेन हे तात जनक! क्व वजसि कुत्र व्रजसि इत्यस्फुटमुदितमुक्तम्। तथापि परिचयादभ्यासपाटवाद् गतार्थं पितृभ्यां केवलावगताभिधेयं वचनमिति शेष:। व्रजत: प्रस्थातु: धैर्यं प्रयाणोत्साहमभिनत्। गमनकारिणा दुर्निमित्तत्वादिति भाव:। उक्तञ्च योगयात्रायाम् –
यानात्पुरा निपतनं बृहतीव काचिद् गर्भेण भारबृहती स्वरपुर:स्थिता स्त्री। आगच्छ तिष्ठ कुत इत्यलमर्थवाचिशब्दाश्च राजगमने प्रतिषेधका: स्यु:।। इति।

अभिवर्त्म वल्लभतमस्य विगलदमलायतांशुका।
भूमिनभसि रभसेन यती विरराज काचन समं
महोल्कया।।[15]

वल्लभतमस्य प्रियतमस्याभिवर्त्माभिमार्गं विगलदङ्गसादात्स्त्रंसमानममलमायतं चांशुकं वस्त्रं यस्या:, अन्यत्र विगलन्तो विशीर्यमाणा अमला उज्ज्वला आयता दीर्घीभूता अंशवो रश्मयो यस्या: सा। भूमिर्नभ इव तस्मिन्भूमिनभसि रभसेन वेगेन यती यान्ती। काचनाङ्गना महोल्कया समं सदृशं विरराज। अत्र प्रस्थातुरग्रे स्वकान्ताया महोल्कसादृश्यभवनमेव दुर्निमित्तमिति भाव:। शिशुपालपक्षीयाणां राज्ञां प्रस्थानसमये विभिन्नापशकुनानां वर्णनं कृतं कविना ।
एवमेव षोडशसर्गे सात्यकि: शिशुपालदूतं प्रति कथयति –

प्रकटं मृदु नाम जल्पत: परुषं सूचयतोऽर्थमन्तरा।
शकुनादिव मार्गवर्तिभि: पुरुषादुद्विजितव्यमीदृश:।।[16]

प्रकटं प्रकाशं मृदु नाम मृदुकल्पं जल्पत: कथयत:। अन्तरान्त: परुषमनिष्टमर्थं सूचयत:। ईदृशोऽन्त:शुद्धिशून्यात्पुरुषादीदृश: शकुनादिव बहि: शुभङ्करं कुर्वतोऽन्तरा परुषं सूचयत: पिङ्गलादिपक्षिण इव मार्गवर्तिभि: सन्मार्गवर्तिभिरध्वगैश्चोद्विजितव्यम्। मार्गे पिङ्गलादिपक्षिणां वचनमनिष्टसूचकमिति सङ्केतितमत्र।

श्रीकृष्णसेनायाः प्रयाणसमये शुभलक्षणान्यपि वर्णितानि कविना।

चलाङ्गुलीकिसलयमुद्धतैः करैरनृत्यत स्फुटकृतकर्णतालया।
मदोदकद्रवकटभित्तिसङ्गिभिः कलस्वरं मधुपगणैरगीयत।।[17]

स्फुटं कृतः कर्णतालः कर्णताडनं यथा तथा द्विपघटया कर्त्र्या चलाङ्गुल्य एव किसलया यस्मिन्कर्मणि तत्तथोद्धतैः करैर्हस्तैरनृत्यत अनर्ति। तथा मदोदकेन द्रवास्वार्द्रासु कटभित्तिषु गण्डस्थलेषु सङ्गिभिरासक्तैः मधुपगणैर्भ्रमरगणैः कलस्वरं मधुरस्वरमगीयत गीतम्।
गजघटया प्रशमितपांशुभिर्मदाम्बुभिर्मही सिक्ता। आननैः श्रवणसुखकरमुद्यन्मेघगर्जितगम्भीरं तूर्यमवाद्यत। पवनेन कम्पितपटा अभ्रङ्कषा ध्वजाश्च तत्र तत्र उत्क्षिप्ताः। इत्थं गजसमूहेन शाङ्गिर्णः पुरतः स्वयं मङ्गलमाचरितम्।
यात्रायां शुभाशुभदिशाज्ञानं कविना प्रकटितम्। यथा –

यियासितामथ मधुभिद्विवस्वता जनो जरन्महिषविषाणधूसराम्।
पुरः पतत्परबलरेणुनालिनीमलक्षयद्दिशमभिधूमितामिव।।[18]

अथ मधुभिद्धरिरेव विवस्वान्। तेन यियासिता यातुमिष्टां जिगमिषिताम्। पततोऽभिधावतः परबलस्य शत्रुसैन्यस्य रेणून् मलते धारयतीति तन्मालिनी। अत एव जरतो वृद्धस्य महिषस्य विषाणवद्धूसरां धूम्रां पुरोऽग्रे दिशमभितो धूमोऽस्याः संजातस्तामभिधूमितामिव जनो लोकोऽलक्षयत्। अत्राहुः - 'अङ्गारिणी दिग्रविविप्रयुक्ता यस्यां रविस्तिष्ठति सा प्रदीप्ता। प्रधूमिता यास्यति यां दिनेशः शेषाः प्रशस्ताः शुभदाश्च ताः स्युः।।

## संदर्भ


1. वेदाङ्गज्योतिषम् श्लोक सं. 3
2. शिशु. 1.75
3. शिशु. 2.61
4. शिशु. 20.45
5. शिशु. 3.1
6. शिशु. 19.6
7. शिशु. 3.22
8. शिशु. 9.6
9. शिशु. 13.22
10. शिशु. 15.81
11. शिशु. 15.85
12. शिशु. 15.86
13. शिशु. 15.90
14. शिशु. -----
15. शिशु. 15.92
16. शिशु. 16.19
17. शिशु. 17.37
18. शिशु. 17.41